# SarayunamasahasranAmastotram from Bhushundiramayana

# सरयूनामसहस्रनामस्तोत्रम् भुषुण्डिरामायणान्तर्गतम्

## Document Information

Text title : sarayUsahasranAmastotram from bhushuNDIrAmAyaNa

File name : sarayUsahasranAmastotrambhushuNDIrAmAyaNa.itx

Category : raama, sahasranAma, nadI, devii, devI

Location : doc_raama

Proofread by : Pallasena Narayanaswami ppnswami at gmail.com

Source : Bhushundi Ramayanam pashchima-uttara khaNDa, adhyAYa 36

Latest update : July 15, 2017

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# सरयूनामसहस्रनामस्तोत्रम् भुषुण्डिरामायणान्तर्गतम्

शुक उवाच -
साब्रवीज्जातमात्रैव भूमानं पुरुषं ततः ।
रामप्रेमोद्गमोद्भूतरोमाञ्चव्याप्तविग्रहम् ॥ १॥

सरयूरुवाच -
किं नु कुर्यामहे भूमन् किं च मे नाम निश्चितम् ।
भवत्पार्श्वेऽथवान्यत्र कुत्र मेऽवास्थितिर्भवेत् ॥ २॥

रामप्रेमोद्भवानन्दात्सुस्रुर्नेत्राणि नः पृथक् ।
तुदत्थबाष्पवारिभ्यः सम्भूता त्वं तरङ्गिणी ॥ ३॥

सरयूरिति ते नाम तस्मान्निश्चितमेव मे ।
नयनोत्थैर्जलैर्जाता तस्मान्नेत्रजलेति च ॥ ४॥

वसिष्ठश्च भवत्तीरे तपसा सिद्धिमेष्यति ।
वासिष्ठीति भुवि ख्यातं तव नाम भविष्यति ॥ ५॥

साकेतनगरे गत्वा रामस्य सुखवर्द्धिनी ।
रामगङ्गेति ते नाम भुवि ख्यातं भविष्यति ॥ ६॥

पूर्वं तु तमसा जाता ऐरावतरदाहतात् ।
महाशैलस्य शिखरात्पश्चात्त्वं विश्वपाविनी ॥ ७॥

द्विर्वहेति च ते नाम लोके ख्यातं भविष्यति ।
प्रेमानन्दात्समुद्भूतां तस्मात्प्रेमजलेति च ॥ ८॥

अथ तेऽहं प्रवक्ष्यामि नामसाहस्रकं शुभम् ।
यस्य श्रवणमात्रेण प्रेमानन्दः प्रवर्द्धते ॥ ९॥

सरयूः प्रेमसरयूः प्रेमानन्दसरोजला ।
प्रेमपूर्णा प्रेममयी प्रेमतोया महोदका ॥ १०॥

रामगङ्गा रामनदी रामप्रेमा महानदी ।
सुधावर्णा चन्द्रवर्णा धनसाररसोदका ॥ ११॥

रसात्मिका रसमयी रसपूर्णा रसोदका ।
रसा रसप्रिया रस्या रसारम्या रसावहा ॥ १२॥

सुधामा वसुधा लक्ष्मीर्वसुधामा वसूद्भवा ।
सरिद्वरा सरिच्छ्रेष्ठा सरिद्रूपा सरोमयी ॥ १३॥

रामकेलिकरी रामा रामचित्तप्रसादिनी ।
लोकसन्तापहरिणी हनुमत्सेवितोदका ॥ १४॥

मरीचिर्मरुदाराध्या रामचन्द्रतनुप्रभा ।
द्रवद्व्यमयो देवी दोलारूढामृतद्रवा ॥ १५॥

द्राविणी द्रविणावासा द्रवामृतमयी सरित् ।
सरणी सारिणी सारा साररूपा सरोवरा ॥ १६॥

पुरुषाश्रुमयी मोदा प्रमोदवनवाहिनी ।
कल्लोलिनी कलिहरा कल्मषघ्नी कलाधरा ॥ १७॥

कलामयी कलापूर्णा चन्द्रिका रामचन्द्रिका ।
वैकुण्ठवाहिनी वर्या वरेण्या वारिदेवता ॥ १८॥

गुडूची गुडसुस्वादुर्गौडी गुडसमुद्भवा ।
वासिष्ठी च वशिष्ठश्रीर्वसिष्ठाराध्यदेवता ॥ १९॥

वसिष्ठावशिनी वश्या वश्याकर्षणकारिणी ।
सूवर्णा चैव सौवर्णीसुवर्णसिकतावहा ॥ २०॥

सुवर्णतटिनी चैव सुवर्णस्रवणोदका ।
विधिनेत्रजला वैधी विधिप्रेमा विधिप्रिया ॥ २१॥

उत्तरङ्गा च तरला तारकापतिनिर्मला ।
तमसा तामसहरा तमोहर्त्री तमोवहा ॥ २२॥

तीक्ष्णा तीक्ष्णगतिस्तुङ्गा तुङ्गवीचिर्विनोदिनी ।
तुङ्गतीरा तुङ्गभवा तुङ्गतीरप्रसारिणी ॥ २३॥

तुङ्गतोया तुङ्गवहा तुङ्गगा तुङ्गगामिनी ।
तडित्प्रभा तडिद्रूपा तडिद्वीचिस्तड्डिज्जला ॥ २४॥

तप्तोदका तप्ततनुस्तापहा तापसाश्रया ।
तपःसिद्धिकरी तापी तपनातापहारिणी ॥ २५॥

तापसन्तापहरिणी तपनोत्था तपोमयी ।
तापिनी तपनाकारा तपर्तुः सुखकारिणी ॥ २६॥

तरङ्गिणी तरलिनी तरणी तारिणी तरिः ।
स्थेमा स्थिरगतिः स्थात्रीस्थावरोत्था स्थिरोदका ॥ २७॥

स्थैर्यकर्त्री स्थिराकारा स्थिरा स्थावरदेवता ।
पूता पूतगतिः पूतलोकपावनकारिणी ॥ २८॥

पाविनी पवनाकारा पवमानगुणप्रदा ।
शीतला शीतसलिला शीतलाकृतिवाहिनी ॥ २९॥

मन्दा मन्दगतिर्मन्दा मन्दलस्वरपूरणी ।
मन्दाकिनी मदाघूर्णी मन्दमन्दगमोदका ॥ ३०॥

मीनाढ्या मीनसुखदा मीनकेलिविधायिनी ।
महोर्मिमालिनी मान्या माननीयमहागुणा ॥ ३१॥

मरुत्सेव्या मरुल्लोला मरुत्तनृपसेविता ।
इक्ष्वाकुसेविततटा ईक्षाकृतमहोत्सवा ॥ ३२॥

ईक्षणीया इक्षुमती इक्षुखण्डरसोदका ।
कर्पूरनीरा कर्पूरा कर्पूरधवलोदका ॥ ३३॥

नागकन्या नगारुढा नगराजविभेदिनी ।
पातालगङ्गा पूताङ्गी पूजनीया परापरा ॥ ३४॥

पारावारैकनिलया पारावारविहारिणी ।
परिगता परप्रेमा परप्रीतिविवर्द्धिनी ॥ ३५॥

फल्गूजला फल्गुजला फाल्गुनस्य वरप्रदा ।
फेनावृता फेनसिता फेनोद्गमनकारिणी ॥ ३६॥
फलकारा फलकरी फलिनी फलपूजिता ।
फणीन्द्रफणसंसेव्या फणिकङ्कणभूषिता ॥ ३७॥

खराकारा खरतरा खरराक्षसहारिणी ।

खगेन्द्रभजनीया च खगवंशविवर्द्धिनी ॥ ३८॥

खगारुढा खगैः स्तुत्या खगजा च खगामिनी ।
खसाराध्या खसवृता खसवंशैकजीवना ॥ ३९॥

खेलागतिः खलहरा खलतापरिहारिणी ।
खदिनी खादिनी खेद्या खेदहा खेलकारिणी ॥ ४०॥

गणनीया गणैः पूज्या गाणपत्यमहाफला ।
गणेशपूजिता गण्या गणदुःखनिवारिणी ॥ ४१॥

गुणाढ्या गुणसम्पन्ना गुणगुम्फितविग्रहा ।
गुणनीया गुरुगुणा गुरुपूज्या गुरुद्रवा ॥ ४२॥

गुर्वी गीष्पतिसंसेव्या गिराचार्या गिराश्रया ।
गिरीन्द्रकन्दरावासा गिरीशसेवितोदका ॥ ४३॥

कोटिचान्द्रमसज्योतिः कोटिचान्द्रिमहोज्ज्वला ।
कटाहभेदनपरा कठोरजवगामिनी ॥ ४४॥

कठशाखापाठरता काठकानां वरप्रदा ।
काष्ठापरा काष्ठभेदा काष्ठाष्टकविनोदिनी ॥ ४५॥

करवीरप्रसूनाढ्या करवालसितिच्छविः ।
कम्बुश्वेता कबुकण्ठा कम्बुभृत्प्राणवल्लभा ॥ ४६॥

धर्माढ्या धर्मशमनी धर्मपाठविनोदिनी ।
धर्मयोगसुसन्तुष्टा घटाकारा घटोदका ॥ ४७॥

घट्टिनी घट्टसुखदा घट्टपालवरप्रदा ।
घटकोटिसुसम्पन्ना घटाटोपजलोर्मिभृत् ॥ ४८॥

चाञ्चल्यदारिणीन्द्राणी चाण्डालगतिदायिनी ।
चण्डातपक्लेशहरा चण्डा चण्डिममण्डिता ॥ ४९॥

चाम्पेयकुसुमप्रीता चपला चपलाकृतिः ।
चम्पूग्रन्थविधानज्ञा चञ्चूपुटहृतोदका ॥ ५०॥

च@क्रमा च@क्रमकरी चमत्कारविवर्द्धिनी ।
चर्मकारकुलोद्धारा चर्मा चर्मण्वती नदी ॥ ५१॥

भूमेक्षणसमुद्भूता भूगता भूमिपापहा ।
भूतलस्था भयहरा विभीषणसुखप्रदा ॥ ५२॥

भूतप्रेतपिशाचघ्नी दुर्गतिक्षयकारिणी ।
दुर्गमा दुर्गनिलया दुर्गाराधनकारिणी ॥ ५३॥

दुराराध्या दुःखहरा दुर्गभूमिजयप्रदा ।
वन्या वनप्रिया वाणी वीणारवविनोदिनी ॥ ५४॥

वाराणसीवासरता वासवी वासवप्रिया ।
वसुधा वसुधामा च वसुदात्री वसुप्रिया ॥ ५५॥

वसुतेजा वसुपरा वसुवासविधायिनी ।
वैश्वानरी विश्ववन्द्या विश्वपावनकारिणी ॥ ५६॥

वैश्वानररुचिर्विश्वा विश्वदीप्तिर्विशाखिनी ।
विश्वासना विश्वसना विश्ववश्यत्वकारिणी ॥ ५७॥

विश्वावसुप्रियजला विश्वामित्रनिषेविता ।
विश्वाराध्या विष्णुरूपा वषट्कारा़क्षरप्रिया ॥ ५८॥

पानप्रिया पानकर्त्री पातकौघप्रहारिणी ।
नानायुधा नवजला नवीनगतिभूषिता ॥ ५९॥

उत्तरङ्गगतिस्तारा स्वस्तरुप्रसवार्चिता ।
तुहिनाद्रिसमुद्भूता तुहिता तुहिनोदका ॥ ६०॥

कूलिनी कूलमिलिता कूलपातनतत्परा ।
कालातिगामिनी काली कालिका कालरूपिणी ॥ ६१॥

कीलालिनी कीलहरा कीलिताखिलपातका ।
कमला कमलाकारा कमलार्चितविग्रहा ॥ ६२॥

करालकमलावेशा कलिकोल्लासकारिणी ।
करिणी कारिणी कीर्णा कीर्णरूपा कृपावती ॥ ६३॥

कुलीना कुलवन्द्या च कलनादा कलावती ।
खगेन्द्रगामिनि खल्या खलीना खलतापहा ॥ ६४॥

स्खलद्गतिः खमार्गस्था खिलाखिलकथानका ।
खेचरीमुद्रिकारूपा खखेगातिगामिनी ॥ ६५॥ syllable missing

गङ्गाजला गीतगुणा गीता गुप्तार्थबोधिनी ।
गीयमानगुणग्रामा गीर्वाणा च गरीयसी ॥ ६६॥

ग्रहापहा ग्रहणकृद् गृह्या गृह्यार्थदायिनी ।
गेहिनी गिलिताघौघा गवेन्द्रगृहगामिनी ॥ ६७॥

गोपीजनगणाराध्या श्रीरामगुणगायिनी ।
गुणानुबन्धिनी गुण्या गुणग्रामनिषेविता ॥ ६८॥

गुहमाता गुहान्तस्था गूढा गूढार्थबोधिनो ।
घर्घरारावमुदिता घर्घराघटनाकृतिः ॥ ६९॥

घटीबन्धैकनिलया घटा घण्टालविग्रहा ।
घनाघनस्वना घोरा घनसारसमाकृतिः ॥ ७०॥

घोषा घोषवती घुष्या घोषेश्वरसुतप्रिया ।
घोराघनाशनकरी घर्मातिभयहारिणी ॥ ७१॥

घृणाकरी घृणिमती घृणिर्घ्राणेन्द्रियप्रिया ।
घ्राता घर्मांशुदुहिता घातिताघा घनाघना ॥ ७२॥

चान्द्री चन्द्रमती चन्द्रा चन्द्रिका चन्द्रिकाकृतिः ।
चन्द्रका चन्द्रकाकारा चन्दनालेपकारिणी ॥ ७३॥

चन्दनद्रवसंशीता चमत्कृतजगत्त्रया ।
चित्ता चित्तहरा चित्या चिन्तामणिसमाकृतिः ॥ ७४॥

चिन्ताहरा चिन्तनीया चराचरसुखप्रदा ।
चतुराश्रमसंसेव्या चतुराननसेविता ॥ ७५॥

चतुरा चतुराकारा चीर्णव्रतसुखप्रदा ।
चूर्णा चूर्णौषधसमा चपला चपलाकृतिः ॥ ७६॥

छलिनो छलहर्त्री च छलिताशेषमानवा ।
छद्मिनी छद्महरिणी छद्मसद्मविधायिनी ॥ ७७॥

छन्ना छन्नगतिश्छिन्ना छिदाकर्त्री छिदाकृतिः ।
छन्नाकारा छन्नजला छन्नपातकहारिणी ॥ ७८॥

जयघोषा जयाकारा जैत्रा जनमनोहरा ।

जन्मिनी जन्महरिणी जगत्त्रयविनोदिनी ॥ ७९॥

जगन्नाथप्रिया लक्ष्मीर्जम्बूद्वीपसुखप्रदा ।
जम्बालिनी जवगतिर्जपाकुसुमसुन्दरी ॥ ८०॥

जम्बीररससन्तुष्टा जाम्बूनदविभूषणा ।
जटाधरा च जटिला जम्भारिकरपूजिता ॥ ८१॥

जङ्गमा जितदैतेया जित्वरा जयवर्द्धिनी ।
जीवान्तरगतिर्जीव्या जीवाकर्षणतत्परा ॥ ८२॥

ज्यानिनादैकमुदिता जरानाशनतत्परा ।
जलाश्रया जलकरी जालिनी जालवर्तिनी ॥ ८३॥

जीमूतवर्षिणी जारा जारिणी जारवल्लभा ।
झञ्झारवा झणत्कारा झझंरारावकारिणी ॥ ८४॥

झिल्लीनिनादमुदिता झल्लरीनादतोषिणी ।
झरी झर्झरिकारूपा झाङ्कारवकारिणी ॥ ८५॥

टांकारिणी टंकहस्ता टापिनो टापगामिनी ।
टंटंनिनादमुदिता ठंठंशब्दप्रबोधिनी ॥ ८६॥

ठकुरा ठक्कुराज्ञा च ठंठंनिनदकारिणी ।
डमरूवादनपरा डक्काडांकारकारिणी ॥ ८७॥

डाकिनी डामराचार्या डमड्डुमरवोत्कटा ।
ढक्का ढक्कारवाढ्या च ढंढाढुंढरवासिनी ॥ ८८॥

ढुंढिपूरणदक्षा च ढुंढिराजप्रपूजिता ।
तत्तातता महाताता तेजिनी तेजसान्विता ॥ ८९॥

तोयान्विता तोयकरी तटपातनकारिणो ।
तरुणी तरुसछन्ना तलशीतलनीरिणी ॥ ९०॥

तुलसीसौरभाढ्या च तुलारहितरूपिणी ।
तन्वी तवममाकारा तपस्या तपसि स्थिता ॥ ९१॥

थेईथेईशब्दरता थंथुशब्दसुखावहा ।
दयावती दुःखहरा द्राविणी द्रवदेवता ॥ ९२॥

दीनदारिद्र्यथहरिणी दमिनी दमकारिणी ।
दूरागता दूरगता दूरिताशेषपातका ॥ ९३॥

दुर्वृत्तघ्नो दैत्यहरा दारिणी दावहारिणी ।
देवदारुवनप्रीता दोषघ्नी दीप्तिकारिणी ॥ ९४॥

दीपमाला द्वीपचारा दुरिता दुरितापहा ।
धन्या धनवती धीरा धामती धेनुमण्डिता ॥ ९५॥

धयिनी धारिणी धात्री धात्रीतरुफलाशिनी ।
धाराधारा धराकारा धराधरविचारिणी ॥ ९६॥

धाविनी धावनकरी धनेश्वरवरप्रदा ।
धर्मप्रदा धर्मरता धार्मिका धार्मिकप्रिया ॥ ९७॥

धर्मार्थकाममोक्षाख्या धमनी धमनीगतिः ।
धत्तूरफलसम्प्रीता धृताध्यानपरा धृतिः ॥ ९८॥

धारणा धीर्धराधीशा धीगम्या धारणावती ।
नम्या नमोनमःप्रीता नर्मा नर्मगतिर्नवा ॥ ९९॥

नीरजाक्षी नीरवहा निम्नगा निर्मलाकृतिः ।
नारायणी नरप्रज्ञा नारी नरकहारिणो ॥ १००॥

नवीना नवपद्माभा नाभीष्टगतिदापिनी ।
नगोद्भवा नगारूढा नागलोकातिपाविनी ॥ १०१॥

नन्दिनी नादिनी नादा निन्दानादविवर्जिता ।
नागरी नागरप्रीता नागराजप्रपूजिता ॥ १०२॥

नागकेसरमालाढ्या नागेन्द्रमदगन्धिनी ।
पूर्णिमा परमाकारा परापरविवेकिनी ॥ १०३॥

प्रभातिनी प्रभावन्धा प्रभासा पुरुषेष्टदा । var प्रभावन्ध्या
पुरुषार्थप्रदा पूता पक्तिपावनकारिणी ॥ १०४॥

फलाढ्या फलदात्री च फणीन्द्रवरदायिनी ।
फालिनी फलपुष्पाङ्का फाल्गुनस्फीतकीर्तिदा ॥ १०५॥

बलिपूज्या बलिहिता बलदेवप्रपूजिता ।
बाला बालरविप्रख्या बालरामगुणप्रदा ॥ १०६॥

बलाकिनी बहुलगा बहुला बहुलाभदा ।
बाहुक्रीडामहोर्मिश्च बह्वीबाहुलमासगा ॥ १०७॥

भाविता भाबुककरी भर्मदा भर्गपूजिता ।
भवहर्त्रीं भवप्रीता भवानी भुवनोद्धता ॥ १०८॥

भूतिकर्त्री भूतिहर्त्रीं भूतिनी भूतसेविता ।
भूधरा भूधरोद्भेदा भूतनाथार्चितोदका ॥ १०९॥

भूरितोया भूचरी च भूपतिप्रियकारिणी ।
मनोरमा महोत्साहा महनीया महात्मिका ॥ ११०॥

माहात्म्यवर्द्धिनी मोहा मोदिनी मोहनाशिनी ।
मुग्धा मुग्धगतिर्मध्या मध्यलोकप्रियावहा ॥ १११॥

मधुरा मधुरालापा मधुरापतिवल्लभा ।
माधुर्यवारिधिर्माध्वी माध्वीककुसुमोत्कटा ॥ ११२॥

मधूकपुष्पमुदिता मदिरारसघूर्णिता ।
मादिनी मालतोमालामल्लीमाल्यप्रपूजिता ॥ ११३॥

मन्दारपुष्पपूज्या च मन्दा मन्दाकिनीप्रिया ।
मन्दराचलसंस्थाना मन्दिरान्तरमोदिनी ॥ ११४॥

यवसावलिसम्भिन्ना यमुनाजलकेलिनी ।
यमभीतिप्रशमिनी यमिनीयमिनां हिता ॥ ११५॥

योगमार्गप्रदा योग्या योगाचार्य प्रपूजिता ।
योक्री योगबलप्रीता योगिकार्थप्रकाशिनो ॥ ११६॥

यादयेत्तद्रमनोरम्या यादोवरविभूषिता ।
यत्तत्पदार्थरूपा च यास्काचार्यहितप्रदा ॥ ११७॥

यस्या यशःप्रदा यम्या यज्ञा यज्ञविवर्द्धिनी ।
रमा रामा रता रम्या रमणी रमणीयभूः ॥ ११८॥

रामणीयकराशिश्च राशीशरुचिदायिनी ।
रामप्रिया रामरता रामरामा रमारुचिः ॥ ११९॥

रुच्या रुचिप्रदा रोचिप्रदा रोचितविग्रहा ।

रूपिणी रूपनिरता रूपकार्थसुखावहा ॥ १२० ॥

रञ्जिनी रजनीरूपा रजताचलसुन्दरी ।
रजोगुणवती रक्षा रक्षोघ्नी राजसी रतिः ॥ १२१ ॥

लावण्यकृल्लवणहा लक्ष्मीर्लक्ष्यानुबन्धिनी ।
लक्ष्मणस्य प्रीतिकरी लक्ष्मणा लक्ष्मणाश्रया ॥ १२२ ॥

ललामा लोचनभवा लोला लोलोर्मिमालिका ।
लीलावती लाभकरी लोभनीयगुणावहा ॥ १२३ ॥

लज्जावती लोकवती लोकालोकपरस्थिता ।
लोकनीया लोकहिता लोकेशवरदायिनी ॥ १२४ ॥

लालित्यकारिणी लीला लोपामुद्रासुखप्रदा ।
वनजा वनरम्या च वानीरवनगामिनी ॥ १२५ ॥

वानरेश्वरसुप्रीता वाग्वती विन्ध्यवासिनी ।
वाराणसीपुण्यकरी वारिगा वारिवहिनी ॥ १२६ ॥

वारिवाहगणश्यामा वारणेन्द्रसुखप्रदा ।
वातरंहा वातगतिर्वामाराज्यसुखप्रदा ॥ १२७ ॥

वलिता वनिता वाणी वाणील्लभववल्लभा ।
वाहिनी वहनौद्धत्या वदावदविवादभूः ॥ १२८ ॥

शमिनी शामिनी श्यामा श्यामायामप्रबोधिनी ।
शमीकमुनिसंसेव्या शमीवृक्षोद्भवा शमा ॥ १२९ ॥

शनैश्चरा शनिहरा शनिग्रहभयापहा ।
शमनार्तिहरा शम्पा शतह्रदहविलासिनी ॥ १३० ॥

शेषाशेषगतिः शोष्या शेषपुत्री शशिप्रभा ।
श्मशानचारिणी शून्या शून्याकाशनिवासिनी ॥ १३१ ॥

शरार्तिहा शरीरार्तिहारिणी शरभेश्वरी ।
शल्यापहा शलभहा शलदानवनाशिनी ॥ १३२ ॥

षण्मुखी षण्मुखीहता षडक्षीणा षडङ्गभूः ।
षष्ठीशनाथसंसेव्या षष्टीपूजनकारिणी ॥ १३३ ॥

षड्वर्गजायिनी षद्धा षड् वषड्कप्रपूजिता ।
सिता सीता सुता सूता सतां पूज्या सतां गतिः ॥ १३४॥

सदाहास्यक्रिया सत्या सती सत्यार्थदायिनी ।
सरणिः सरयूः सीरा सलिलौघप्रवाहिनी ॥ १३५॥

सद्धर्मचारिणो सूर्मिः सूपास्या सूपपादिता ।
सुलभा सुखदा सुप्ता सङ्ग्रामभयहारिणी ॥ १३६॥

सूत्तरा सुतरा सोमा सोमनाथप्रपूजिता ।
सामिधेनी समित्प्रीता समिधा च समेधिनी ॥ १३७॥

समा समाना समगा सम्मत्ता सुमता सुभा ।
सुमार्च्या सुषुमाधारा सरोजाबलिपूजिता ॥ १३८॥

हरिप्रिया हिमवहा हिमानी हिमतोयगा ।
हरिदष्टकसङ्कीर्त्या हरिदश्वप्रपूजिता ॥ १३९॥

हम्भारवेकसुप्रीता हिन्दोलाकेलिकारिणी ।
हिंसादोषप्रशमिनी हिंस्रमुक्तिप्रदायिनी ॥ १४०॥

हारिणी हरसंस्तुत्या हकाराक्षरसंस्तुता ।
हत्याहरा हठरिपुर्हरचापप्रभञ्जिनी ॥ १४१॥

क्षेम्या क्षेमकरी क्षेमा क्षुधाक्षोभविनाशिनी ।
क्षुण्णा क्षोदा क्षीरनिधिः क्षीरसागरवासिनी ॥ १४२॥

क्षीवा क्षुतिक्षुरप्रख्या क्षिप्रा क्षिप्रार्थकारिणो ।
क्षोणिः क्षोणिहिता क्षामा क्षपाकरनिभोदका ॥ १४३॥

क्षारा क्षाराम्बुनिधिगा क्षपासञ्चारकारिणी ।
अमला अम्लसलिला अदःशब्दार्थरूपिणी ॥ १४४॥

अकाराक्षररूपा च ह्याकाराक्षररूपिणी ।
आर्द्राम्बरा आमजला आषाढी आश्विनात्मिका ॥ १४५॥

आग्रहायणरूपा च आतुरत्वविनाशिनी ।
आसुरी आसुरिसुता आशुतुष्टा इलेश्वरी ॥ १४६॥

इन्द्रिया इन्द्रसम्पूज्या इषुसंहारकारिणी ।
इत्वरी इनसंसेव्या इरा इनवरेन्दिरा ॥ १४७॥

ईश्वरो ईतिहन्त्री च ईरिणी ईस्वरूपिणी ।
उदकौघप्रवहिणी उत्तङ्कमुनिपूजिता ॥ १४८॥

उत्तराद्रिसुता उन्ना उत्तीर्णा उत्तरप्रदा ।
उत्तप्तकाञ्चननिभा ऊहिनी ऊहकारिणी ॥ १४९॥

ऊषरा ऊषरक्षेत्रा ऊतिरूपो ऋभूस्तुता ।
ऋतप्रवर्तिनी ऋक्षा ऋक्षेन्द्रकुलपूजिता ॥ १५०॥

ॠकाराक्षररूपा च ॠकारी ॠस्वरूपिणी ।
ऌतका ऌतकाचार्या ऌकाराक्षरवासिनी ॥ १५१॥

एषा एषितवेदार्था एवमेवार्थरूपदा ।
एवकारार्थगम्या च एतच्छब्दार्थरूपिणी ॥ १५२॥

एता ऐता ऐकृतिश्च ऐन्द्री ऐंकाररूपिणी ।
ओता ओकाररूपा च औषधीशप्रपूजिता ॥ १५३॥

औन्नत्यकारिणी अम्बा अम्बिका अङ्कवर्जिता ।
अन्तकप्रेयसी अङ्घ्या अन्तका अतवार्जिता ॥ १५४॥

अःकारमुदिता चैव सर्ववर्णस्वरूपिणी ।
सर्वशास्त्रार्थरूपा च सर्वकल्याणकारिणी ॥ १५५॥

इदं श्रीसरयूदेव्या नामसाहस्रमुत्तमम् ।
मया निगदितं श्रुत्वा सर्वपापैर्विमुच्यते ॥ १५६॥

बहूनि तव नामानि अनन्तान्येव सर्वशः ।
त्व गङ्गा यमुना चैव गोदा चैव सरस्वती ॥ १५७॥

नर्मदा चैव कावेरी भीमा कृष्णा च पार्वती ।
सिन्धुः सिन्धुसुता चैव सर्वदेवस्वरूपिणी ॥ १५८॥

यस्त्वां स्मरति वै नित्यं मनुजो रामसेवकः ।
सर्वविघ्नहरा तस्य भविष्यसि न संशयः ॥ १५९॥

प्रातरुत्थाय च नरो यौऽवगाहेत वै त्वयि ।
तस्य सर्वाघहन्त्रो त्वं रामभक्तिं प्रवर्तयेः ॥ १६०॥

दर्शनात्स्पर्शनाच्चैव स्मरणान्नामकीर्तनात् ।

रामप्रेमप्रदा नित्यं त्वं सर्वशुभकारिणी ॥ १६१॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पश्चिमखण्डे सीताजन्मोत्सवे प्रमोदवनवर्णने सरयूनामसहस्रकं नाम षड्विंशोऽध्यायः ॥ ३६॥

Proofread by Pallasena Narayanaswami ppnswami at gmail.com

*SarayunamasahasranAmastotram from Bhushundiramayana*

pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*